प्रगल्भश्च विनीतो मेधया पुनः। गीतिज्ञो वाक्यसम्राव्यः स्वरेणाखिलभाषकः” इत्युपक्रमे एवंविधानतो वाच्यं वाचकेन विपश्चिता। तपःशमात्मकं सर्वं स्वर्गादिफलसाधकम्। शनैर्विबोध्य वै वाच्यमध्यात्मादि च यद्भवेत्। क्रुद्धोक्तियुद्धसंक्षोभं धारावर्त्तेन (वेगेन) वाचयेत्। सरागं ललितैर्वाक्यैर्वाचयेद् दृढसङ्गमे। नानावृत्तानुरूपेण लालित्येन च वाचयेत्। सर्गाध्याये समाप्ते च कथापर्य्यन्त एव वा। प्रशस्तशब्दसंयोगे कुर्य्यादिति विरामणम्। समाप्तौ वाचको भीष्म! ब्रूयादेवं विचक्षणः। अववार्य्य जगच्छान्तिमन्ते शान्त्युदकं सृजेत्। सुश्रुतं सुश्रुतं ब्रूयादस्तु व्याख्यातमित्यदः। लोकः प्रवर्त्ततां धर्मे राजा चास्तु सदा जती। धर्मवान् धनसम्पन्नो गुरुश्चास्तु निरामयः। इति प्रोच्य यथाऽऽश्रात मन्तव्यं च विभावतः।

**वाचन** न॰ वच-णिच-स्वार्थे वा णिच्-ल्युट्। १पठने २कथने च युच्। पठने स्त्री। [पापादौ।

**वाचनिक** त्रि॰ वचनेन निर्वृत्तम् ठक्। वाक्यनिष्पादिते

**वाचस्पति** पु॰ ६त॰ अलुक्समा॰। १बृहस्पतौ। २पुष्यनक्षत्रे च

**वाच्(चा)** स्त्री उच्यतेऽसौ अनया वा वच-क्विप् नि॰ वा टाप्। १वाक्ये अमरः २वागिन्द्रिये च।

**वाचाट** त्रि॰ वाक्+कुत्सायां वाक्शब्देऽस्त्यर्थे आटच् भत्वात् न कः। कुत्सितबहुभाषिणि अमरः। आलच्। वाचालोऽप्यत्र।

**वाचिक** त्रि॰ वाचा कृतम् वाच+ठक् भत्वात् न कः। वाक्यनिष्पादिते पापादौ वाङ्मयशब्दे दृश्यम्। २वाक्यारम्भभेदे। “आलापश्च विलापश्च संलापश्च प्रलापकः। अनुलापोऽपलापश्च सन्देशश्चातिदेशिकः। अपदेशोपदेशौ च निर्देशो व्यपदेशकः। कीर्त्तिता वचनारम्भा द्वादशामी मनीषिभिः” उज्ज्वलमणिः। [नैर्मल्ये च।

**वाचोयुक्ति** स्त्री ६त॰ अलुक्स॰। १वाचादर्शितयुक्तौ २वाक्य-

**वाच्य** न॰ वच-भावे ण्यत् न कः। १दूषणे २प्रतिपादने धरणिः। ३कथने च। कर्मणि ण्यत्। ४दूष्ये ५प्रतिपाद्ये अभिधया बोध्यार्थे च सा॰ द॰।

“नचाल्पत्वबहुत्वाभ्यां प्रयोगाणां विशिष्यते। वाच्यवाचकभावोऽयमक्षपादादिशब्दवत्। विभीतकेऽप्यक्षशब्दो यद्यप्यल्पैः प्रयुज्यते। तथापि वाचकस्तस्य शायते शकटाक्षवत्” म॰त॰भट्टवा॰। [भावे-अ। वाञ्छा।

**वाञ्छ** कामे भ्वा॰पर॰सक॰सेट् इदित्। वाञ्छति अवाञ्छीत्।

**वाज** न॰ वज-घञ्। १अन्ने २घृते ३जले ४यज्ञे च मेदि॰। ५शरपक्षे अमरः ६वेगे पु॰ ८निस्वने ८पक्षे पु॰ मेदि॰ १०मुनौ पु॰विश्वः। [कात्या॰श्रौ॰तत्प्रकारादि दृश्यम्।

**वाजपेय** पुंन॰ वाजमन्नं घृतं वा पेयमत्र। यागभेदे

**वाजपेयिन्** पु॰ वाजपेय+अस्त्यर्थे इनि। १वाजपेययागकर्त्तरि उपचारात् २तद्वंश्ये च।

**वाजसन** पु॰ वाजमन्नं सनोति ददाति सन-अच्। १विष्णौ विष्णुस॰। २शिवे भा॰ आनु॰ १७अ॰।

**वाजसनि** पु॰ राजस्य अन्नस्य सनिर्दानं येन। सूर्य्ये “आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः” इत्युक्तेस्तस्य वृष्टिद्वारा अन्नदातृत्वात् तथात्वम्।

**वाजसनेय** पु॰ वाजसनेः सूर्य्यस्य कात्र: ढक्। याज्ञवल्क्ये “आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते” बृहदारण्य॰ श्रुतिः। अस्यार्थः। आदित्यादधीतान्यादित्यानि शुक्लानि शुद्धानि। इयमत्र आख्यायिका। व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति। स योगसामर्थ्यात् मूर्त्तां विद्यां विधायोदवाम। वान्तानि यजूंषि गृह्णीतेति गुरूक्ता अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षन्। तानि यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्य्यमाराध्यान्यानि शुक्लानि यजूंषि प्राप्तवान्। तानि च जाबालगौधेयकाण्वमाध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्यः पाठितवान्” वेददी॰। “एवं स्तुतः स भगवान् वाजिरूपधरो रविः। यजूंष्ययातयामानि मुनयेऽदात् प्रसादतः। यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः। जगृहुर्वाजसन्यस्ताः। काण्वमाध्यन्दिनादयः” भाग॰ १२।६।६७ श्लो॰

**वाजसनेयिन्** पु॰ ब॰व॰। वाजसनेयेन प्रोक्तमधीयते इनि। यजुर्वेदशाखाभेदाध्यायिषु विप्रादिषु। २तदुक्तरीत्या कर्मार्हेषु शूद्रेषु च “शूद्रा वाजसनेयिनः” म॰मा॰त॰।

**वाजिदन्त** पु॰वाजिनां दन्त इव पुष्पमस्य। १वासके रत्नमा॰ कप्। वाजिदन्तक तत्रैव।

**वाजिन्** पु॰ वाजः वेगः पक्षो वा अस्त्यस्य इनि। १घोटके २वाणे ३वासके च शब्दर॰। ४वेगवति त्रि॰ स्त्रियां ङीप्। सा च ५अश्वगन्धायाञ्च ६घोटक्याम् स्त्री